**R-206**

MP BOARD CLASS 10 SANSKRIT (GENERAL) QUESTION PAPER WITH ANSWER-2017

Time : 3 Hrs.] [MM: 100

निर्देशः 1. सर्व प्रश्नाः अनिवार्याः सन्ति। 2. प्रश्नानां सम्मुखे अङ.काः प्रदत्ताः ।

**प्र.1. उचितविकल्पं चित्वा लिखत -**

(1) 'महेन्द्रः' इत्यस्मिन् पदे सन्धिः अस्ति -

(अ) दीर्घ सन्धिः (ब) गुण सन्धिः (स) वृद्धि सन्धिः (द) अयादि सन्धिः

(2) निस् + छलः' इत्यस्य सन्धिः अस्ति -

(अ) निच्छलः (ब) निशछलः (स) निषछलः (द) निश्छलः

(3) "विसर्ग सन्धेः' उदाहरणमस्ति -

(अ) षडाननः (ब) तच्छीलः (स) प्रत्येकः (द) मनोरथः

(4) 'जगदीशः' इत्यस्य पदस्य सन्धिविच्छेदः अस्ति -

(अ) जगत् + ईशः (ब) जग + दीशः (स) जगत + इशः (द) जग + ईशः

(5) अधोलिखितेषु अव्ययम् अस्ति

(अ) कथा (ब) करोति (स) रूपं (द) कदा

उत्तर : (1) (ब) गुण सन्धि: (2) (द) निश्छल: (8) (द) मनोरथ: (4) (अ) जगत्+ईश: (5) (द) कदा

**प्र.2 उचित विकल्पं चित्वा लिखत -**

(1) द्विगुः समासस्य उदाहरणम् अस्ति -

(अ) उपगङ्.गम् (ब) त्रिभुवनम् (स) प्रतिदिनम् (द) दशाननः

(2) 'चौरभयम्' इत्यस्मिन् पदे समासः अस्ति -

(अ) द्वितीया तत्पुरुषः (ब) चतुर्थी तत्पुरुषः (स) सप्तमी तत्पुरुषः (द) पञ्चमी तत्पुरुषः

(3) 'परोपकारः' इति पदस्य समासविग्रहः भवति -

(अ) परोपस्य कारः (ब) परेषाम् उपकारः (स) परेण उपकारः (द) परम् उपकारः

(4) निर्धनः' इत्यस्मिन् पदे उपसर्गः अस्ति -

(अ) निस् (ब) निर् (स) नि (द) निध

(5) अधोलिखितेषु उपसर्गः अस्ति -

अ) अस् (ब) इव (स) अद्य (द) सम्

उत्तर : (1) (ब) त्रिभुवनम् (2) (द) पञ्चमी तत्पुरुषः (8) (ब) परेषाम् उपकारः (4) (ब) निर (5) (द) सम्

**प्र.3 उचितविकल्पं चित्वा लिखत -**

1. 'नेष्यामः' इत्यस्मिन् पदे धातुः अस्ति -

(अ) नेष्य (ब) नेस् स. नेषु द. नी

2. वर्धताम्' इत्यस्मिन् पदे पुरुषः अस्ति -

(अ) प्रथमपुरुष (ब) मध्यमपुरुष (स) महापुरुषः

3. "द्रक्ष्यन्ति' इत्यस्मिन् पदे लकारः अस्ति -

(अ) लट् लकार: (ब) लोट् लकारः (स) लड्. लकार: (द) लृट् लकार:

4. 'भवेयुः' इत्यस्मिन् पदे वचनम् अस्ति -

(अ) एकवचनम् (ब) द्विवचनम् (स) बहुवचनम्

5. 'अहम् अपि आपणं गच्छामि अस्मिन् वाक्ये अव्ययम् अस्ति -

(अ) अहम् (ब) अपि (स) आपणं (द) गच्छामि

उत्तर : (1) (द) नी (2) (अ) प्रथम पुरुषः (3) (द) लृट् लकारः (4) (स) बहुवचनम् (5) (ब) अपि

4. उचितविकल्पं चित्वा लिखत -

(1) 'गुणवान्' इत्यस्मिन् पदे प्रत्ययः अस्ति -

(अ) क्तवतु (ब) ल्यप् (स) क्तिन् (द) मतुप्

(2) "सेवमानः' इत्यस्मिन् पदे प्रत्ययः अस्ति -

(अ) तुमुन् (ब) क्त्वा (स) शानच (द) शतृ

(3) 'बालिका' इत्यस्मिन् पदे प्रत्ययः अस्ति -

(अ) आप् (ब) जाप् (स) ज्ञाप् (द) टाप्

(4) 'शतृ' प्रत्ययस्य उदाहरणम् अस्ति -

(अ) गतवती (ब) जेतुम् (स) हसन् (द) गुणिन्

(5) ...........किल मनुष्याणां देवतानां च दैवतम्। -

(अ) माता (ब) पिता (स) देवता (द) मनुष्यः

उत्तरः (1) (द) मतुप् (2) (स) शानच् (3) (द) टाप् (4) (स) हसन् (5) (अ) माता

**प्र.5. प्रदत्तैः शब्दैः रिक्त स्थानपूर्ति कुरुत -**

(मूर्खत्वम्, पितृसमः, यशः, भूतानि, कदापि)

1. महर्षिः .............शरीरेण अमरः अस्ति।
2. दानेन ...... ......वशी भवन्ति।
3. ज्येष्ठो भ्राता .........।
4. स्वकर्मणि प्रवर्तितुं ........ नैव खिद्यते।
5. पठतो नास्ति ........... ।

उत्तर : (1) यशः (2) भूतानि (8) पितृसमः (4) कदापि (5) मूर्खत्वम्

**प्र.6. अधोलिखितेषु प्रश्नेषु त्रयाणां प्रश्नानाम् उत्तराणि संस्कृतभाषायाम् एकवाक्येन लिखत -**

1. विदिशामध्ये किं नाम स्मारको वर्तते?
2. स्थकारः पर्वतदेशे किमर्थं गतः?
3. कस्य अभिनिष्क्रमणसंस्कारः अस्ति?
4. शिष्यान् कथं परीक्षेत?
5. दयानन्दः केषां प्रचारमकरोत्?

उत्तरः (1) विदिशा मध्ये "लोहाड्.गी" नाम स्मारको विधते।

(2) स्थकार: पल्लवानयनार्थं पर्वतदेशे।

(3) राहुलस्य अभिनिष्क्रमरणसंस्कारः अस्ति।

(4) शिष्यान् शीलगुणादिभिः परीक्षेत्।

(5) दयानन्दः चिरोपेक्षितवेदानां प्रचारमकरोत ।

**प्र.7. अधोलिखितेषु द्वयोः शब्दयोः शब्द-रूपाणि त्रिषु वचनेषु लिखत -**

1. कवि - द्वितीयाविभक्तिः
2. साधु - चतुर्थीविभक्तिः
3. राम - तृतीयाविभक्तिः

उत्तर:

| विभक्तिः | एकवचनं | द्विवचनं | बहुवचनं |
|---|---|---|---|
| (1) द्वितीया (कवि) | कविम् | कवी | कवीन् |
| (2) साधु | साधवे | साधुभ्याम् | साधुभ्यः |
| (3) तृतीया (राम) | रामेण | रामाभ्याम् | रामैः |

**प्र.8. "त्वया" अथवा "तासाम्" इति पदस्य विमक्तिं वचनं च लिखत।**

उत्तर : "त्वया"

विभक्ति : - तृतीया विभक्तिः

वचनं - एकवचनं

**प्र.9. अधोलिखितेषु गद्यांशेषु गद्यांशद्वयस्य प्रश्नानाम् उत्तराणि संस्कृतभाषायां लिखत -**

**(अ)** सूर्यवंशस्य राजा सगरः आसीत्। सः एकदा अश्वमेधयागं कृतवान् । यागस्य अन्ते यागस्य अश्वः यत्र तत्र सञ्चारं कृतवान् । अश्वमेधं कृत्वा सगरः स्वयम् इन्द्रः भविष्यति इति देवेन्द्रस्य असूया आसीत्। तस्मात् सः यागस्य विघ्नं कर्तुं मार्गं चिन्तितवान्। ततः अश्वं गृहीत्वा पाताललोके कपितमुनेः पुरतः स्थापितवान्। तदा मुनिः तपः कुर्वन ध्याने आसीत्। अतः सः किमपि न ज्ञातवान्।

1. सूर्यवंशस्य राजा कः आसीत्?
2. सः एकदा किं कृतवान्?
3. यागस्य अश्वः कुत्र सवारं कृतवान्?

4. कः यागस्य विघ्नं कर्तुं मार्गं चिन्तितवान्?

5. इन्द्रः अश्वं गृहीत्वा पाताललोके कस्य पुरतः स्थापितवान्?

उत्तरः (अ) (1) सूर्यवंशस्य राजा सगरः आसीत् ।

(2) सः एकदा अश्वमेधयागं कृतवान् ।

(3) यागस्य अश्वः यत्र तत्र सञ्चारं कृतवान्।

(4) इन्द्रः यागस्य विघ्नं कर्तुं मार्गं चिन्तितवान्।

(5) इन्द्रः अश्वं गृहीत्वा पाताललोके कपिल मुनेः पुरतः स्थापितवान् ।

**(ब)** वरुणदेवः वृष्टिं वर्षति। सूर्यदेवः प्रकाशं प्रयच्छति। भूमाता वृक्षस्य आधारभूता अस्ति। वायुः अनिलं ददाति। ते सर्वे वृक्षं पालयन्ति पोषयन्ति रक्षन्ति च । ते न कदापि "मम अधिकारः वर्तते" इति अवदन्। ते सर्वे परोपकारिणः । परं यूयं सर्वे परोपकारिण: वृक्षस्य साहाय्यं स्वीकृत्य तमेव नाशयितुं कृतसङ्.कल्पा यूयं स्वाश्रयमेव नाशयथ। अस्मिन् वृक्षे छिन्ने सति यूयं कुत्र गच्छथ?

1. कः वृष्टिं वर्षति?

2. सूर्यदेवः किं प्रयच्छति?

3. का वृक्षस्य आधारभूता अस्ति?

4. कः अनिलं ददाति?

5. के परोपकारिण?

**उत्तर:(ब)** (1) वरुणदेवः वृष्टिं वर्षति।

(2) सूर्यदेवः प्रकाशं प्रयच्छति।

(3) भूमाता वृक्षस्य आधारभूता अस्ति।

(4) वायुः अनिलं ददाति।

(5) वरुणदेवः सूर्यदेवः भूमाता अनिलः वृक्षः च परोपकरिणः ।

**(स)** "सरलसंस्कृतमेव भारतराष्ट्रस्य राष्ट्रभाषा भवेत।" अयमेव भावः श्रीमातुः कथनेऽपि दृश्यते। सा "संस्कृतेवराष्ट्रभाषाभवितुम् अर्हति" इत्युक्तवती। अन्येऽपि प्रसिद्धाः नायकाः संस्कृतस्य प्रशंसा कृतवन्तः महनीयतां च स्वीकृतवन्तः । यथा प्रथमः राष्ट्रपतिः डॉ.

राजेन्द्रप्रसादः कथितवान् यत् "संस्कृतसाहित्यं न केवलं भारतस्य कृते अपितु मानवजातेः कृते अमूल्यधनम् अस्ति"।

1. सरल संस्कृतमेव भारतराष्ट्रस्य किं भवेत्?

2. प्रसिद्धा नायकाः कस्य प्रशंसां कृतवन्तः?

3. भारतस्य प्रथमराष्ट्रपतिः कः आसीत्?

4. संस्कृतसाहित्यं मानवजातेः कृते किं अस्ति?

5. कथितवान्' इत्यस्य पदस्य प्रकृतिप्रत्ययञ्च पृथक् कुरुत।

**प्र.10 अधोलिखितेषु पद्यांशेषु पद्यांशद्वयस्य प्रश्नानाम् उत्तराणि संस्कृतभाषायां लिखत -**

**(अ)** ॐ यज्जाग्रतो दूरमुदैति दैवं तदु सुप्तस्य तथैवैति।

दूरङ्गमं ज्योतिषां दूरदैति दैवं तदु सुप्तस्य तथैवैति।।

1. कस्य मनः दूरम् उदैति?

2. कः दूरङ्गमम् अस्ति?

3. ज्योतिषाम् एकं ज्योतिः कः?

4. मे मनः किमस्तु?

5. 'शिवः' इति शब्दस्य विलोमशब्दं लिखत।

उत्तरः पद्यांश

(अ) (1) जाग्रतः मनः दूरम् उदैति।

(2) मनः दूरग्डमम अस्ति।

(3) ज्योतिषाम् एकं ज्योतिः मनः।

(4) मे मनः शिवसड्कल्पमस्त।

(5) "शिवः' इति शब्दस्य विलोमशब्दः 'अशिवः' ।

**(ब)** मत्ता गजेन्द्रा मुदिता गवेन्द्रा, वनेषु विक्रान्ततराः मृगेन्द्राः।

रम्या नगेन्द्रा निमृता नरेन्द्राः, प्रक्रीडितो वारिधरैः सुरेन्द्रः।।

1. गजेन्द्राः किं अभवन्?

2. सुरेन्द्रः कैः सह प्रकीडित?

3. वर्षाकाले मृगेन्द्राः कीदृशाः भवन्ति?

4. गवेन्द्राः कीदृशाः भवन्ति?

5. 'वनेषु इत्यस्य पदस्य विभक्तिं वचनं च लिखत।

**(स)** सत्येन धार्यते पृथ्वी सत्येन तपते रविः।

सत्येन वातिवायुश्च सर्वं सत्ये प्रतिष्ठितम्।।

1. रविः केन तपते?

2. पृथ्वी केन धार्यते?

3. वायुः केन वाति?

4. सर्व कस्मिन् प्रतिष्ठितम्?

5. 'धार्यते' इति पदे का धातुः अस्ति?

**उत्तर :(स)** (1) रविः सत्येन तपते।

(2) पृथ्वी सत्येन धार्यते।

(3) वायुः सत्येन वाति।

(4) सर्वं सत्ये प्रतिष्ठितम्।

(5) 'धार्यते: "धृ" धातुः अस्ति।

**प्र.11. युग्ममिलन कुरुत**

'अ' - 'आ'

1. नानृतम् - (क) कर्तव्यः

2. जनः स्वकर्मण्यैव - (ख) गुरुदक्षिणार्थी

3. समयस्य सदुपयोगः - (ग) रतस्तिष्ठति

4. कौत्सः - (घ) ब्रूयात्

- (ङ.) दानी

उत्तर: 'अ' - 'आ'

(1) नानृतम्       -      (घ) ब्रूयात्

(2) जनः स्वकर्मण्यैव     -      (ग) रतस्तिष्ठति

(3) समयस्य सदुपयोगः  -      (क) कर्त्तव्यः

(4) कौत्सः  -      (ख) गुरूदक्षिणार्थी

**प्र.12. शुद्धवाक्यानां समक्षम् "आम्" अशुद्धवाक्यानां समक्षं "न" इति लिखत -**

क. रघुः वरतन्तुशिष्यः आसीत्।

ख. चञ्चलं मनः न अनुभ्रामयेत्।

ग. कात्यायनी सीतायै ज्ञानं दत्तवती।

घ. महाभारतं लक्षकपद्यात्मकं महाकाव्यम् अस्ति।

उत्तर : आम् / न

(क) रघुः वरतन्तुशिष्यः आसीत्। (न)

(ख) चञ्चलं मनः च अनुभ्रामयेत् । (आम्)

(ग) कात्यायनी सीतायै ज्ञानं दत्तवती। (न)

(घ) महामारतं लक्षकपद्यात्मकं महाकाव्यम् अस्ति। (आम्)

**प्र.13 अधोलिखितेषु प्रश्नेषु चतुर्णां प्रश्नानाम् उत्तराणि संस्कृतभाषायाम् एकपदेन लिखत -**

1. कस्मिन् प्रवर्तितुं कदापि न खिद्यते?

2. छत्रसालस्य पितुः नाम किम्?

3. भारतीयसमाजे का सदैव पूज्या अस्ति?

4. अन्येषां वस्तूनाम् अपेक्षया अधिकः महत्तवपूर्णः कः?

5. सर्वोत्तमं भूषणं किम् अस्ति?

6. पुरुषादः कः आसीत्?

उत्तरः (1) स्वकर्मणि।

(2) श्रीचम्पतरायः।

(3) नारी।

(4) समयः।

**प्र.14. प्रश्नपत्रे समागतान् श्लोकान् विहाय स्वपाठ्यपुस्तकस्य सुभाषितद्वयं लिखत।**

**उत्तर : सुभाषित-1**

**(सज्जन-प्रशंसा)**

गङ्.ग। पापं शशी तापं दैन्यं कल्पतरूस्तथा।

पापं तापंचदैन्यं च नन्ति सन्तोमहाशयाः।।

**सुभाषित-2**

**(क्षमा)**

क्षमाशस्त्रं करे यस्य दुर्जनः किं करिष्यति।

अतृणे पतितो वह्निः स्वयमेवोपशाम्यति।।

**प्र.15 स्वप्राचार्यस्य कृते अवकाशार्थम् एकं प्रार्थनापत्रं संस्कृते लिखत।**

**उत्तरः अवकाशार्थं प्रार्थनापत्रम्**

सेवायाम,

श्रीमन्तः प्राचार्य महादेयः,

शासकीय उ.मा. विद्यालयः,

ग्वालियर नगरम्, मध्यप्रदेशः

**विषयः- अवकाशार्थं प्रार्थनापत्रम् ।**

**महोदयः,**

सविनयं निवेदनं इदं यद् अहं अध अकस्माद् ज्वरपीड़ितः अस्मि । अत एव विद्यालयं आगन्तुम् सर्वथा असमर्थः अस्मि। कृपया पञ्चदिवसानां (पञ्चदिनाड्.कतः नवदिनांक-पर्यन्तम्) अवकाशं स्वीकुर्वन्तु।

धन्यवाद!

भवदीयः शिष्यः

नाम- राहुलः

कक्षा- दशमी

दिनांड्.कः- 02/03/2017

अथवा

**स्वभ्रातुः जन्मदिनोत्सवस्य कृते स्वमित्राय आमन्त्रणपत्रम् संस्कृते लिखत।**

**प्र.16 अधोलिखितेषु पञ्च' अशुद्ध कारक वाक्यानां शुद्धिः करणीया -**

1. रामः सर्प बिभेति।
2. सीता रामस्य सह वनं गता।
3. रामः विद्यालयम् गच्छामि।
4. गुरुं नमः।
5. नृपः विप्रम् धनं ददाति।
6. मम दुग्धं रोचते।

**उत्तरः** (1) रामः सपति विमेति।

(2) सीता रामेण सह वनं गता।

(3) रामः विद्यालयम् गच्छति।

(4) गुरवे नमः।

(5) नृपः विप्राय धनं ददाति।

**प्र.17 अधोलिखितवाक्यानां कथानुसारेण क्रम संयोजनं कुरुत -**

1. ततः वासुदेवः रामनाथपुरं प्राप्य रामदेवस्य गृहम् अगच्छत् ।
2. गड्गतीरे मार्कण्डेयः नाम कश्चन मुनिः वसति स्म।
3. शिष्यः अनन्तरदिने एव रामनाथपुरं प्रति प्रस्थितवान् ।
4. वासुदेवः तस्य प्रिय शिष्यः आसीत्।
5. किञ्चिदग्रे गतः वासुदेवः कञ्चित् देवालयम् अपश्यत् ।

उत्तरः क्रम संयोजन

(1) ततः वासुदेवः रामनाथपुरं प्राप्य रामदेवस्य गृहम् अगच्छत्।

(2) गड्गतीरे मार्कण्डेयः नाम कश्चन मुनिः वसति स्म।

(3) शिष्यः अनन्तरदिने एव रामनाथपुरं प्रति प्रस्थितवान्।

(4) वासुदेवः तस्य प्रिय शिष्यः आसीत्।

(5) किञ्चिदने गतः वासुदेवः कञ्चित् देवालयम् अपश्यत्।

**प्र.18 अधोलिखितम् अपठितं गद्यांशं सम्यक् पठित्वा प्रश्नानाम् उत्तराणि संस्कृतभाषायाम् लिखत -**

सतां सज्जनानां, सङ्गतिः सम्पर्कः, संसर्गो वा सत्सङ्गतिः इति कथयते। वस्तुतः सत्सङ्गत् एव मानवः समुन्नतो भवति। सज्जनानां संसर्गेण जनः सज्जनः भवति , दुर्जनानां संसर्गेण च दुर्जनः भवति। स्थाने

**एवोक्तं-** 'संसर्गजा दोषगुणा भवन्ति इति। अतः स्वसमुन्नतिं इच्छता जनेन सर्वदा सतामेव सगतिर्विधेया।

1. अस्य गद्यांशस्य शीर्षकं लिखत।
2. केन जनः सज्जनः भवति?
3. स्वसमुन्नतिम् इच्छता जनेन किं करणीयः?
4. गद्यांशस्यास्य सारं लिखत।
5. दुर्जनः शब्दस्य विलोम शब्दं लिखत।

उत्तरः अपठित गद्यांश

(1) अस्य गद्यांशस्य शीर्षकः “सत्सङ्गतिः” इति।

(2) सज्जनानां संसर्गेण जनः सज्जनं भवति।

(3) स्वसमुन्नतिम इच्छता जनेन सर्वदा सतामेव सगतिर्विधेया।

(4) गद्यांशस्यास्य सागरः य- “जनाः सदैव सतामेव सङ्गतिः करणीयाः," इति।

(5) "दुर्जनः" शब्दस्य विलोम शब्दः “सज्जनः" इति।

**प्र.19 अधोलिखितेषु एकं विषयं स्वीकृत्य शतशब्देषु संस्कृतभाषायाम् निबंध लिखत -**

1. अनुशासनम्।
2. मम दिनचर्या।
3. अस्माकं देशः।
4. संस्कृतभाषायाः महत्तवम्।

**उत्तरः (4) निबंध- संस्कृतभाषायाः महत्तवम् :**

संस्कृतभाषा अस्मांक देशस्य प्राचीनतमा भाषा अस्ति। प्राचीनकाले सर्वे एव भारतीयाः संस्कृतभाषायामेव व्यवहारं कुर्वन्ति स्म। कालान्तरे विविधाः प्रान्तीयाः भाषाः प्रचलिताः अभवन्, किन्तु संस्कृतस्य महत्तवम् अद्यापि अक्षुण्णं वर्तते। सर्वे प्राचीनग्रन्थाः चत्वारो वेदाश्च संस्कृतभाषायामेव सन्ति। संस्कृतभाषा भारतराष्ट्रस्य एकतायाः आधारः अस्ति। संस्कृतं विश्वस्य महत्तमा भाषा अस्ति। संस्कृतं लैटिनभाषायाः अपेक्षया अधिकम् समृद्धम् अस्ति। संस्कृतभाषायाः यत्स्वरूपं अधो प्राप्यते तदेव अधतः सहस्त्रवर्षपूर्वम् अपि आसीत्। संस्कृतभाषायाः स्वरूपं पूर्णरूपेण वैज्ञानिक अस्ति। अस्य व्याकरणं पूर्णतः तर्कसम्मतं सुनिश्चितं च अस्ति । संस्कृतभाषा ग्रीकभाषायाः अपेक्षया अधिकं पूर्णः अस्ति। संस्कृतं देवनागरी अस्ति।

आचार्य-दण्डिना सम्यगेवोक्तम् -

"भाषासु मुख्या मधुरा दिव्या गीर्वाणभारतीय।"

विवेकानन्दः उक्तवान्- “संस्कृतं अवश्यमेव शिक्षणीयम्।"

संस्कृतविषये महत्मागान्धिः उक्तवान् यत्- “संस्कृतभाषा भारतीयभाषाभ्यः गगनदी अस्ति।"

संस्कृतभाषैव भारतस्य प्राणभूताभाषा अस्ति। राष्ट्रस्य ऐक्यं च साधयति।

अत एव उच्यते

"संस्कृतिः संस्कृताश्रिता।"